# संस्कृतम् (केन्द्रिकम्) (कोड सं. 322)
# एकादशी (XI)
# पाठ्यक्रमः परीक्षानिर्देशाश्च (2021-22)

भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा, मानवः स्वमनसि विद्यमानान्  विचारान् भावनाः अनुभूतिं च अर्थयुक्तैः ध्वनिभिः लिखितसङ्केतैः च अभिव्यक्तयति सा भाषा। भाषा अभिप्रायप्रकटनस्य साधनम्। वस्तुतः लोके द्वयोः मनुष्ययोः मध्ये परस्परम् अवबोधनाय, भावग्रहणाय, भावविनिमयाय च भाषया विना न अन्यत् स्पष्टतमं सरलतमं च साधनं विद्यते। लोके बहव्यः भाषाः सन्ति यासु संस्कृतभाषा अतिप्राचीनतमा समृद्धा च अस्ति। संस्कृतभाषायाम् एव सन्ति ऋग्यजुस्सामाथर्वाः इति चत्वारः वेदाः, शिक्षा, व्याकरणं, निरुक्तं, ज्योतिषं, छन्दः कल्पः चेति षडङ्गानि, चतुर्दशविद्याः, विज्ञानम्, आयुर्वेदः, योगशास्त्रादयः ग्रन्थाः च । अतः संस्कृतं केवलं भाषा न अपितु किञ्चन जीवनदर्शनम् इति। इयं विद्या (भाषा) भारतीयानां प्रतिष्ठात्मिका कामधेनुः समस्तज्ञानप्रदात्री, ऐक्यप्रदात्री, धर्मार्थकाममोक्षप्रदात्री च अस्ति। सृष्टेः आदितः अद्यावधिः यत् शिक्षणं ज्ञानविज्ञानं च अस्ति तत् सर्वं अस्यां भाषायामेव सन्निहितम् अस्ति। अतिसूक्ष्मभावनां प्रकटयितुं स्पष्टीकर्तुं संस्कृतं विना नैव अन्यत्र विद्यते सामर्थ्यम्। भारतीयं सर्वस्वं विश्वस्य समग्रं तत्त्वं च अस्यां भाषायाम् अस्ति।

संस्कृतस्य भाषावैज्ञानिकत्त्वम् – ऐतिहासिक-वर्णनात्मक-तुलनात्मकाध्ययन-द्वारा भाषायाः प्रकृतेः विकासोत्पत्तेः संरचनायाः अध्ययनपूर्वकं  सर्वेषां विषयाणां सैद्धान्तिकः निर्णयः भाषाविज्ञानेन क्रियते। भाषाविज्ञान-नामकशास्त्रे  शब्दानाम् उत्पत्तिः, वाक्यानां संरचना इत्यादीनां विषयाणां विचारः क्रियते। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सह अस्ति। एवं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां प्रकृति-प्रत्ययादीनां, संज्ञासर्वनाम-क्रिया-विशेषणादीनां नामाख्यात-उपसर्जननिपातानां पदपदार्थविषयकानां विकारादीनां विकारमूलककारकाणाम् अन्येषां विविधविषयाणाञ्च अध्ययनं क्रियते। भाषाविज्ञाने संस्कृतभाषा-विषयक-वर्णोत्पत्ति-सिद्धान्तस्य अतीववैज्ञानिकं निरूपणं कृतं वर्तते।

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा अस्ति। प्रायः सर्वासु भाषासु संस्कृतपरकशब्दाः उपलभ्यन्ते। संस्कृतभाषा भारतीयभाषाणां जननी इति कथ्यते। त्रिवेणीसङ्गमे  सरस्वती नदी यथा अन्तर्लीना अस्ति तथैव सर्वासु भारतीयभाषासु संस्कृतभाषा अपि अन्तर्लीना अस्ति इति सर्वे अङ्गीकुर्वन्ति।

भारतदेशः बहुभाषी देशोऽस्ति। अस्मिन् देशे अनेकतायाम् एकतावर्धिनी भाषेयं सामाजिकसमरसतायै जीवनविकासाय च आवश्यकी वर्तते। संस्कृतस्य सांस्कृतिकं महत्त्वं वर्णयन्तः विद्वांसः कथयन्ति "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिमूलं संस्कृतम्, साहित्यं संस्कृतिवाहकञ्च इति।" एषा संस्कृतिः न केवलं भारतस्य अपि तु विश्वस्य मुकुटायमाना अस्ति। उक्तं च

सत्यमहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।
विश्वशान्तिः सुखधात्री भारतीया हि संस्कृतिः॥

संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते॥

एवं संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था वैज्ञानिकी च भाषा अस्ति। सम्प्रति युगेऽस्मिन् प्रमुखैः उद्देश्यैः संस्कृतभाषा शिक्षणीया अस्ति।

**शिक्षणोद्देश्यानि –**

* वसुधैव-कुटुम्बकम् इति भावनाविकासार्थम्
* भारतीयभाषाणां संरक्षणार्थम्
* बौद्धिकविकासपुरस्सरम् आध्यात्मिकनैतिकज्ञानार्थम्
* मानसिकविकासानन्दानुभूतिरसानुभूत्यर्थम्
* भारतीयसंस्कृतेः संरक्षणं ज्ञानवर्धनञ्च।
* आत्मानुशासनसंस्थापनार्थम्
* भाषाशिक्षणकौशलानि वर्धनाय नैपुण्यप्राप्तिः।
* परस्परं वार्तालापमाध्यमेन भावविनिमयः।
* संस्कृतसाहित्यस्य अध्ययनेन ज्ञानानन्दस्य अनुभूतिः।
* मानवजीवनस्य विकासपूर्वकं कल्याणम्।
* संस्कृतभाषया छात्राणां सर्वविधविकासः।

**शिक्षणप्रविधयः -**

* संस्कृतमाध्यमेन सम्भाषणविधिना शनैः शनैः संस्कृतशिक्षणं सम्भविष्यति। गतिवर्धनाय संस्कृताध्यापकानां धैर्येण स्वकीयाध्यापन-कार्यक्रमाणां नियोजनम्। रुचिकरभाषाभ्यासेन भाषिकोपलब्धिः। भाषिकाभ्यासाय वार्तालाप-कथाश्रवण-वादविवाद-संवाद-वर्णनपरकप्रतियोगिताभिः भाषाशिक्षणं कारयितुं शक्यते।
* विभिन्नप्रामाणिकसंस्थानां कार्यक्रमाः साहित्यसामग्र्यश्च प्रयुज्य उत्तमशिक्षणं कर्तुं शक्यते।
* संस्कृतभाषया उपलब्ध-दृश्य-श्रव्य-सामग्री-माध्यमेन भाषाभ्यासः।
* विभिन्नपाठ्यसामग्रीद्वारा शिक्षकः स्वकीयं शिक्षणकार्यं रुचिकरं कर्तुं शक्नोति।
* भाषाशिक्षकः छात्रान् स्नेहपूर्वकम् (आत्मीयभावेन) पाठयेत्।
* अद्यतनपूर्वकं साहित्यकोश-शब्दकोश-सन्दर्भग्रन्थानां सहायतया छात्राणां तत्परतावर्धनम्।
* प्राचीनार्वाचीनयोर्मध्ये समन्वयस्थापनद्वारा नूतनशिक्षणविधिभिश्च संस्कृतशिक्षणम्।

**कौशलानि-**

* ज्ञानात्मक-अवबोधनात्मक-अनुप्रयोगात्मक-विश्लेषणात्मक-संश्लेषणात्मक-मूल्याङ्कनात्मक-लक्षिताधिगमनविशेषाः।
* श्रवणकौशलम् – भावाधिग्रहणाय ध्वन्यात्मकं भाषायाः प्रथमं कौशलम् इदम्। अस्य साधनानि- गुरुमुखम्, आकाशवाणी, दूरवाणी, परिवारसदस्याः, समाजः, कक्ष्याः, ध्वनिमुद्रणयन्त्रम्, दूरदर्शनम् इत्यादयः।
* भाषणकौशलम्- भावाभिव्यक्तये ध्वन्यात्मकं भाषायाः इदं द्वितीयं कौशलम्। वाग्-रूपं भावप्रकटनम् एव भाषणम्, परिसरप्रभावेण आधारेण वा भाषणशक्तिः जायते।
* पठनकौशलम् – भावाधिग्रहणाय लिप्यात्मकं भाषायाः तृतीयं कौशलम् इदम्। (अर्थग्रहणपूर्वकं स्पष्टरूप-वाचनम् इत्यर्थः)
* लेखनकौशलम्- भावाभिव्यक्तये लिप्यात्मकं भाषायाः चतुर्थं कौशलम् इदम्। (ध्वनिरूपे विद्यमानं भाषांशं लिपिरूपे अवतारणं लेखनम् इति उच्यते)

## कक्षा – एकादशी (2021-22)
## संस्कृतम् (केन्द्रिकम्)
## (कोड नं. 322)

**आहत्य-अङ्काः -80+20**
**आहत्य-कालांशाः – 200**

**वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागद्वयं भविष्यति –**

| | | |
|---|---|---|
| **'अ' – भागः (बहुविकल्पात्मकाः प्रश्नाः)** | **40 अङ्काः** | |
| अनुप्रयुक्त – व्याकरणम् | 20 अङ्काः | 60 कालांशाः |
| पठितावबोधनम् | 10 अङ्काः | 40 कालांशाः |
| संस्कृतसाहित्येतिहासस्य सामान्यः परिचयः | 10 अङ्काः | 20 कालांशाः |
| **'आ' – भागः (वर्णनात्मकाः प्रश्नाः)** | **40 अङ्काः** | |
| अपठित – अवबोधनम् | 10 अङ्काः | 20 कालांशाः |
| रचनात्मक– कार्यम् | 15 अङ्काः | 30 कालांशाः |
| पठित – अवबोधनम् | 15 अङ्काः | 50 कालांशाः |

**भागानुसारं विषयाः मूल्यभारः च**

| **'अ' – भागः (बहुविकल्पात्मकाः प्रश्नाः)** | | **40 अङ्काः** |
|---|---|---|
| **खण्डः** | **विषयाः** | **मूल्यभारः** |
| | **अनुप्रयुक्त – व्याकरणम्** | |
| 1. | सन्धिः | 1×3=3 |
| 2. | प्रत्ययाः | 1×3=3 |
| 3. | शब्दरूपाणि – वाक्यप्रयोगः | 1×3=3 |
| 4. | धातुरूपाणि-वाक्यप्रयोगः | 1×3=3 |
| 5. | उपपदविभक्तिप्रयोगः | 1×3=3 |
| 6. | वाच्यपरिवर्तनम्<br>(लट्लकारे, क्त-क्तवतु-प्रत्यययोः माध्यमेन भूतकालार्थे च) | 1×2=2 |
| 7. | अशुद्धिसंशोधनम्<br>(लिङ्ग-वचन-विभक्ति-पुरुष-कालाधारितम्) | 1×3=3 |
| | **पूर्णभारः** | **20 अङ्काः** |
| | **पठित – अवबोधनम्** | |
| 8. | भाषिककार्यम् (पाठाधारितम्) | 1×6=6 |
| 9. | प्रसङ्गानुसारं पदानाम् अर्थचयनम् | 1×4=4 |
| | **पूर्णभारः** | **10 अङ्काः** |

| संस्कृतसाहित्येतिहासस्य सामान्यः परिचयः | | |
|---|---|---|
| 10. | संस्कृतभाषायाः उद्भवः विकासः च | 1×3=3 |
| 11. | वैदिकसाहित्यम् | 1×4=4 |
| 12. | रामायणं महाभारतं पुराणानि च | 1×3=3 |
| | **पूर्णभारः** | **10 अङ्काः** |
| | | **सम्पूर्णभारः 40 अङ्काः** |

| **'आ' – भागः (वर्णनात्मकाः प्रश्नाः)** | | | **40 अङ्काः** |
|---|---|---|---|
| **खण्डः** | **विषयाः** | **प्रश्नप्रकाराः** | **मूल्यभारः** |
| **अपठित – अवबोधनम्** | | | |
| 13. | एकः गद्यांशः (80-100 शब्दपरिमितः) | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम्<br>भाषिककार्यम् | 1×2=2<br>2×2=4<br>1×1=1<br>1×3=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| **रचनात्मक – कार्यम्** | | | |
| 14. | औपचारिकम् अथवा अनौपचारिकं पत्रम्<br>(मञ्जूषायाः सहायतया पूर्णं पत्रं लेखनीयम्) | निबन्धात्मकः | ½×10=5 |
| 15. | लघुकथायां वार्तालापे वा रिक्तस्थानपूर्तिः | निबन्धात्मकः | 1×5=5 |
| 16. | हिन्दी/आङ्ग्लभाषातः संस्कृतेन अनुवादः | पूर्णवाक्यात्मकः | 1×5=5 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| **पठित – अवबोधनम्** | | | |
| 17. | गद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 18. | पद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 19. | नाट्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 20. | भावार्थलेखनम् | निबन्धात्मकः | ½×4=2 |
| 21. | अन्वयः | निबन्धात्मकः | ½×4=2 |
| 22. | वाक्यांशानां संयोजनम् | पूर्णवाक्यात्मकः | ½×4=2 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| | | | **सम्पूर्णभारः 40 अङ्काः** |

**'अ' भागः 40 + 'आ' भागः 40 = सम्पूर्णभारः 80 अङ्काः**

## संस्कृतम् (केन्द्रिकम्) (कोड सं. 322 )
## पाठ्यक्रमः परीक्षानिर्देशाश्च (2021-22)

अवधिः – होरात्रयम्     कक्षा – एकादशी (XI)     पूर्णाङ्काः 80+20

**वार्षिकं मूल्याङ्कनम्**

| अस्मिन् प्रश्नपत्रे भागद्वयं भविष्यति। | | अङ्काः |
|---|---|---|
| भागः "अ" | बहुविकल्पात्मकः | 40 |
| भागः "आ" | वर्णनात्मकः) | 40 |

### अ - भागः     40 अङ्काः
### (बहुविकल्पात्मकाः प्रश्नाः)

| | | |
|---|---|---|
| अनुप्रयुक्तव्याकरणम् (20 अङ्काः) | 1. सन्धिः – पाठ्यपुस्तके प्रयुक्तपदानां सन्धिविच्छेदः सन्धिकरणं च।<br>स्वरसन्धिः (1 अङ्कः)<br>व्यञ्जनसन्धिः (1 अङ्कः)<br>विसर्गसन्धिः (1 अङ्कः) | 3 |
| | 2. प्रत्ययाः –<br>क्त्वा, तुमुन्, ल्यप्, क्त, क्तवतु, तव्यत्,अनीयर्। | 3 |
| | 3. शब्दरूपाणि – वाक्यप्रयोगः।<br>अजन्ताः (1 अङ्कः)<br>➢ बालक,फल, रमा, कवि, मति, वारि, नदी, शिशु, धेनु, मधु, पितृ, मातृ, एवं समानान्तरप्रयोगाः।<br>हलन्ताः (1 अङ्कः)<br>➢ राजन्, भवत्, आत्मन्,विद्वस्, वाच् एवं समानान्तरप्रयोगाः।<br>सर्वनामानि (1 अङ्कः)<br>➢ सर्व, तत्, यत्, किम्, इदम्, (त्रिषु लिङ्गेषु) अस्मद्, युष्मद्। | 3 |
| | 4. धातुरूपाणि – अधोलिखितधातूनां वाक्येषु प्रयोगः।<br>परस्मैपदिनः (2 अङ्कौ)<br>➢ पठ्, लिख्, ज्ञा, दा, क्रुध्, भक्ष्,चुर्, भू, गम्, पा, स्था, दृश्, अस्, घ्रा, श्रु, नृत्, स्पृश्, कथ्, शक्, कृ, हृ, ग्रह् (लट्, लृट्, लोट्, लङ्, विधिलिङ् इति पञ्चलकारेषु)।<br>आत्मनेपदिनः (1 अङ्कः)<br>➢ लभ्, सेव्, याच्, वन्द्, मुद्, वृत्, रुच् (लट्-लृट्-लङ् लकारेषु)। | 3 |
| | 5. उपपदविभक्तिप्रयोगः | 3 |
| | 6. सामान्यं वाच्य-परिवर्तनम्<br>(लट्-लकारे, क्त-क्तवतु-प्रत्यययोः माध्यमेन भूतकालार्थे) | 2 |

| | | |
|---|---|---|
| | 7. **अशुद्धि-संशोधनम्** (लिङ्ग-वचन-विभक्ति-पुरुष-कालाधारितम्) | 3 |
| **पठित-अवबोधनम्** (10 अङ्काः) | 8. **भाषिककार्यम् –(पाठाधारितम्)**<br>(i) विशेषण-विशेष्य-पदचयनम्<br>(ii) वाक्ये कर्तृक्रिया-पदचयनम्<br>(iii) पर्याय-विलोम-पदचयनम्<br>9. **प्रदत्तपङ्क्तिषु प्रसङ्गानुसारं पदानाम् अर्थचयनम्** | 6<br><br><br><br>4 |
| **संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः** (10 अङ्काः) | 10. **संस्कृतभाषायाः उद्भवः विकासः च**<br>11. **वैदिकसाहित्यम्**<br>(वेदाः, ब्राह्मण-आरण्यकानि, उपनिषदः, वेदाङ्गानि) (1+1+1+1)<br>12. **रामायणम्, महाभारतम्, पुराणानि च** (1+1+1) | 3<br>4<br><br>3 |
| | | **योगः = 40 अङ्काः** |

**आ - भागः** **40 अङ्काः**

**(वर्णनात्मकाः प्रश्नाः)**

| | | |
|---|---|---|
| **अपठित – अवबोधनम्** (10 अङ्काः) | 1. **80-100 शब्दपरिमितः अपठितः गद्यांशः, सरलकथा वा प्रश्नवैविध्यम्**<br>➢ **एकपदेन उत्तरम्** (2)<br>➢ **पूर्णवाक्येन उत्तरम्** (4)<br>➢ **समुचितशीर्षकलेखनम्** (1)<br>➢ **वाक्ये कर्तृक्रिया-पदचयनम्, सर्वनामस्थाने संज्ञाप्रयोगः, विशेषण- विशेष्य/पर्याय /विलोमचयनम्** (3) | 10 |
| **रचनात्मकं कार्यम्** (15 अङ्काः) | 2. **औपचारिकम् अनौपचारिकं पत्रम्/प्रार्थनापत्रम्**<br>(मञ्जूषायाः सहायतया पूर्णं पत्रं लेखनीयम्)<br>3. **लघुकथा** (मञ्जूषासाहाय्येन रिक्तस्थानपूर्ति-माध्यमेन)/**वार्तालापे एकपक्षपूरणम्**<br>4. **हिन्दीभाषया आङ्ग्लभाषया वा लिखितानां पञ्चसरलवाक्यानां संस्कृतभाषया अनुवादः।** | 5<br><br>5<br>5 |
| **पठित – अवबोधनम्** (15 अङ्काः) | 5. **गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्**<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि।<br>6. **पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्**<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि।<br>7. **नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्**<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि।<br>8. **भावार्थलेखनम् (मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिः)**<br>9. **प्रदत्तेषु अन्वयेषु रिक्तस्थानपूर्तिः**<br>10. **प्रदत्तवाक्यांशानां सार्थकं संयोजनम्** | 3<br><br>3<br><br>3<br><br>2<br>2<br>2 |
| | | **योगः = 40 अङ्काः** |

**निर्धारिते पुस्तके – 1. भास्वती - प्रथमो भागः -** रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम्।

**2. संस्कृतसाहित्य-परिचय -** रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम्।

**परीक्षायै निर्धारिताः पाठाः**

| **भास्वती - प्रथमो भागः** | | **संस्कृतसाहित्य-परिचय** | |
|---|---|---|---|
| **पाठसङ्ख्या** | **पाठनाम** | **अध्यायसङ्ख्या** | **अध्यायनाम** |
| प्रथमः पाठः | कुशलप्रशासनम् | प्रथम अध्याय | संस्कृत भाषा-उद्भव एवं विकास |
| द्वितीयः पाठः | सौवर्णो नकुलः | द्वितीय अध्याय | वैदिक साहित्य |
| तृतीयः पाठः | सूक्तिसुधा | तृतीय अध्याय | रामायण, महाभारत एवं पुराण |
| पञ्चमः पाठः | वीरः सर्वदमनः | | |
| षष्ठः पाठः | शुकशावकोदन्तः | | |
| अष्टमः पाठः | सङ्गीतानुरागी सुब्बण्णः | | |
| नवमः पाठः | वस्त्रविक्रयः | | |
| दशमः पाठः | यद्भूतहितं तत्सत्यम् | | |
| एकादशः पाठः | स मे प्रियः | | |

**अतिरिक्त-अभ्यासाय पुस्तकानि**

- व्याकरणसौरभम् (संशोधितसंस्करणम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम्।
- रचनानुवादकौमुदी- कपिलदेवद्विवेदिलिखितम् विश्वविद्यालयप्रकाशनम्, वाराणसी।
- वेदपारिजात - रा.शै.अनु.प्र.परि. द्वारा प्रकाशितम्।

# आन्तरिक-मूल्याङ्कनम्

## (अङ्काः - 20)

1. परियोजनाकार्यम् - 10 अङ्काः
2. गतिविधयः - 10 अङ्काः

**उद्देश्यानि –**

- ❖ छात्राणां विविध-जीवन-कौशलानां विकासः।
- ❖ छात्राः समाजस्य विविध-समस्याः ज्ञात्वा समाधाने समर्थाः स्युः।
- ❖ गवेषणात्मक-चिन्तनशक्तेः विकासः।
- ❖ संस्कृत-जगतः समस्यानां सम्मुखीकरणम्।
- ❖ छात्राणां सृजनात्मकक्षमतायाः विकासः।
- ❖ श्रवण-भाषण-पठन-लेखनकौशलानां विकासः।
- ❖ आत्मविश्वासस्य संवर्धनम्

| क्र. सं. | गतिविधयः | उदाहरणानि | अङ्काः | निर्देशाः | मूल्याङ्कनबिन्दवः |
|---|---|---|---|---|---|
| 1 | परियोजना-कार्यम् | ❖ मिथ्यावार्तायाः (Fake News) दुष्प्रभावाः।<br>❖ अध्ययने अन्तर्जालस्य उपयोगिता<br>❖ संस्कृतं व्यवहारभाषां कर्तुं समस्याः समाधानञ्च।<br>❖ "सोशलमीडिया" इत्यस्य सदुपयोगः।<br>❖ भारतीयसंस्कृतौ वैज्ञानिकचिन्तनम्।<br>❖ स्वक्षेत्रे जायमानस्य प्रदूषणस्य कारणानि समाधानञ्च।<br>❖ स्वक्षेत्रे स्वच्छभारताभियानस्य स्थितिः।<br>❖ संस्कृताध्ययनं प्रति छात्राणाम् उदासीनतायाः कारणानि तन्निराकरणोपायाश्च।<br>❖ आयुष्मद्भारतम्' इति सर्वकारीय-योजनाविषये लाभार्थिनां जागरूकतायाः | 10 | ❖ सत्रारम्भे एव विषयः सूचनीयः।<br>❖ आवर्षं छात्राः एतेषु विषयेषु अध्ययनं कुर्युः।<br>❖ शिक्षकेण समये समये परियोजनाकार्यस्य प्रगतिः ज्ञातव्या छात्राणां च मार्गदर्शनं करणीयम्।<br>❖ कदाचित् छात्राः संस्कृतेन लेखितुं कष्टमनुभवन्ति तदा शिक्षकेण साहाय्यं करणीयम्।<br>❖ परियोजनाकार्याणां विवरणं सप्रमाणं सुरक्षितं स्थापनीयम्।<br>❖ परियोजनाकार्याणि संस्कृतेन एव भवेयुः। | ❖ मौलिकता<br>❖ विषयसम्बद्धता<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम् |

| | | | | | |
|---|---|---|---|---|---|
| | | विश्लेषणम्। | | | |
| 2 | श्रवण-भाषण-कौशलम् | ❖ कथा<br>❖ संवादः / वार्तालापः<br>❖ भाषणम्<br>❖ नाटकम्<br>❖ वार्ताः<br>❖ आशुभाषणम्<br>❖ वार्तावलिः (समूहचर्चा)<br>❖ संस्कृतगीतानि<br>❖ श्लोकोच्चारणम्<br>❖ प्रहेलिकाः | 05 | ❖ छात्राः कामपि कथां श्रावयितुं शक्नुवन्ति।<br>❖ शिक्षकः कमपि विषयं सूचयित्वा परस्परं संवादं कारयितुं शक्नोति।<br>❖ दूरदर्शने वार्तावली इत्याख्यः संस्कृत-कार्यक्रमः प्रसारितः भवति तं द्रष्टुं छात्राः प्रेरणीयाः।<br>❖ श्रवण-कौशल-मूल्याङ्कनाय शिक्षकः स्वयम् अपि कथां श्रावयित्वा ततः सम्बद्ध-प्रश्नान् प्रष्टुं शक्नोति।<br>❖ वर्षे न्यूनातिन्यूनं त्रयः गतिविधयः कारणीयाः तेषु सर्वोत्तमाः अङ्काः ग्राह्याः।<br>❖ विवरणं सप्रमाणं सुरक्षितं स्थापनीयम्। | ❖ उच्चारणम्<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम् आरोहावरोह-गतियति-प्रयोगः |
| 3 | लेखन-कौशलम् | ❖ विविधविषयान् आधृत्य मौलिकलेखनम्<br>❖ यथा– माता, पिता, गुरुः, पर्यावरणम्, विद्या, योगः, समयस्य सदुपयोगः, शिक्षा, अनुशासनम् इत्यादयः।<br>❖ शैक्षिकभ्रमणस्य संस्कृतेन प्रतिवेदनलेखनम्।<br>❖ दैनन्दिनीलेखनम्।<br>❖ सङ्केताधारितं कथालेखनम्।<br>❖ श्रुतलेखः | 05 | ❖ छात्राः यथाशक्यं कक्षायामेव लेखनकार्यं कुर्युः।<br>❖ अत्र पञ्जिका-निर्माणम् अपि कारयितुं शक्यते।<br>❖ विवरणं सप्रमाणं सुरक्षितं स्थापनीयम्। | ❖ विषय-सम्बद्धता<br>❖ शुद्धता (विशेषतः पञ्चमवर्णस्य प्रयोगः)<br>❖ समयबद्धता<br>❖ सुलेखः<br>❖ प्रस्तुतीकरणम् |

**अवधातव्यम् –**

उपर्युक्त-परियोजनाकार्याणि गतिविधयश्च उदाहरणरूपेण प्रदत्ताः सन्ति। एतदतिरिच्य एतादृशाः अन्यविषयाः अपि भवितुमर्हन्ति।

*************************************************

# संस्कृतम् (केन्द्रिकम्) (कोड सं. 322)
# द्वादशी (XII)
# पाठ्यक्रमः परीक्षानिर्देशाश्च (2021-22)

भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा, मानवः स्वमनसि विद्यमानान् विचारान् भावनाः अनुभूतिं च अर्थयुक्तैः ध्वनिभिः लिखितसङ्केतैः च अभिव्यक्तयति सा भाषा। भाषा अभिप्रायप्रकटनस्य साधनम्। वस्तुतः लोके द्वयोः मनुष्ययोः मध्ये परस्परम् अवबोधनाय, भावग्रहणाय, भावविनिमयाय च भाषया विना न अन्यत् स्पष्टतमं सरलतमं च साधनं विद्यते। लोके बह्व्यः भाषाः सन्ति यासु संस्कृतभाषा अतिप्राचीनतमा समृद्धा च अस्ति। संस्कृतभाषायाम् एव सन्ति ऋग्यजुस्सामाथर्वाः इति चत्वारः वेदाः, शिक्षा, व्याकरणं, निरुक्तं, ज्योतिषं, छन्दः कल्पः चेति षडङ्गानि, चतुर्दशविद्याः, विज्ञानम्, आयुर्वेदः, योगशास्त्रादयः ग्रन्थाः च। अतः संस्कृतं केवलं भाषा न अपितु किञ्चन जीवनदर्शनम् इति। इयं विद्या (भाषा) भारतीयानां प्रतिष्ठात्मिका कामधेनुः समस्तज्ञानप्रदात्री, ऐक्यप्रदात्री, धर्मार्थकाममोक्षप्रदात्री च अस्ति। सृष्टेः आदितः अद्यावधिः यत् शिक्षणं ज्ञानविज्ञानं च अस्ति तत् सर्वं अस्यां भाषायामेव सन्निहितम् अस्ति। अतिसूक्ष्मभावनां प्रकटयितुं स्पष्टीकर्तुं संस्कृतं विना नैव अन्यत्र विद्यते सामर्थ्यम्। भारतीयं सर्वस्वं विश्वस्य समग्रं तत्त्वं च अस्यां भाषायाम् अस्ति।

संस्कृतस्य भाषावैज्ञानिकत्त्वम् – ऐतिहासिक-वर्णनात्मक-तुलनात्मकाध्ययन-द्वारा भाषायाः प्रकृतेः विकासोत्पत्तेः संरचनायाः अध्ययनपूर्वकं सर्वेषां विषयाणां सैद्धान्तिकः निर्णयः भाषाविज्ञानेन क्रियते। भाषाविज्ञान-नामकशास्त्रे शब्दानाम् उत्पत्तिः, वाक्यानां संरचना इत्यादीनां विषयाणां विचारः क्रियते। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सह अस्ति। एवं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां प्रकृति-प्रत्ययादीनां, संज्ञासर्वनाम-क्रिया-विशेषणादीनां नामाख्यात-उपसर्जननिपातानां पदपदार्थविषयकानां विकारादीनां विकारमूलककारकाणाम् अन्येषां विविधविषयाणाञ्च अध्ययनं क्रियते। भाषाविज्ञाने संस्कृतभाषा-विषयक-वर्णोत्पत्ति-सिद्धान्तस्य अतीववैज्ञानिकं निरूपणं कृतं वर्तते।

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा अस्ति। प्रायः सर्वासु भाषासु संस्कृतपरकशब्दाः उपलभ्यन्ते। संस्कृतभाषा भारतीयभाषाणां जननी इति कथ्यते। त्रिवेणीसङ्गमे सरस्वती नदी यथा अन्तर्लीना अस्ति तथैव सर्वासु भारतीयभाषासु संस्कृतभाषा अपि अन्तर्लीना अस्ति इति सर्वे अङ्गीकुर्वन्ति।

भारतदेशः बहुभाषी देशोऽस्ति। अस्मिन् देशे अनेकतायाम् एकतावर्धिनी भाषेयं सामाजिकसमरसतायै जीवनविकासाय च आवश्यकी वर्तते। संस्कृतस्य सांस्कृतिकं महत्त्वं वर्णयन्तः विद्वांसः कथयन्ति "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिमूलं संस्कृतम्, साहित्यं संस्कृतिवाहकञ्च इति।" एषा संस्कृतिः न केवलं भारतस्य अपि तु विश्वस्य मुकुटायमाना अस्ति। उक्तं च

सत्यमहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।
विश्वशान्तिः सुखधात्री भारतीया हि संस्कृतिः॥

संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते॥

एवं संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था वैज्ञानिकी च भाषा अस्ति। सम्प्रति युगेस्मिन् प्रमुखैः उद्देश्यैः संस्कृतभाषा शिक्षणीया अस्ति।

**शिक्षणोद्देश्यानि** –

* वसुधैव-कुटुम्बकम् इति भावनाविकासार्थम्
* भारतीयभाषाणां संरक्षणार्थम्
* बौद्धिकविकासपुरस्सरम् आध्यात्मिकनैतिकज्ञानार्थम्
* मानसिकविकासानन्दानुभूतिरसानुभूत्यर्थम्
* भारतीयसंस्कृतेः संरक्षणं ज्ञानवर्धनञ्च।
* आत्मानुशासनसंस्थापनार्थम्
* भाषाशिक्षणकौशलानि वर्धनाय नैपुण्यप्राप्तिः।
* परस्परं वार्तालापमाध्यमेन भावविनिमयः।
* संस्कृतसाहित्यस्य अध्ययनेन ज्ञानानन्दस्य अनुभूतिः।
* मानवजीवनस्य विकासपूर्वकं कल्याणम्।
* संस्कृतभाषया छात्राणां सर्वविधविकासः।

**शिक्षणप्रविधयः** -

* संस्कृतमाध्यमेन सम्भाषणविधिना शनैः शनैः संस्कृतशिक्षणं सम्भविष्यति। गतिवर्धनाय संस्कृताध्यापकानां धैर्येण स्वकीयाध्यापन-कार्यक्रमाणां नियोजनम्। रुचिकरभाषाभ्यासेन भाषिकोपलब्धिः। भाषिकाभ्यासाय वार्तालाप-कथाश्रवण-वादविवाद-संवाद-वर्णनपरकप्रतियोगिताभिः भाषाशिक्षणं कारयितुं शक्यते।
* विभिन्नप्रामाणिकसंस्थानां कार्यक्रमाः साहित्यसामग्र्यश्च प्रयुज्य उत्तमशिक्षणं कर्तुं शक्यते।
* संस्कृतभाषया उपलब्ध-दृश्य-श्रव्य-सामग्री-माध्यमेन भाषाभ्यासः।
* विभिन्नपाठ्यसामग्रीद्वारा शिक्षकः स्वकीयं शिक्षणकार्यं रुचिकरं कर्तुं शक्नोति।
* भाषाशिक्षकः छात्रान् स्नेहपूर्वकम् (आत्मीयभावेन) पाठयेत्।
* अद्यतनपूर्वकं साहित्यकोश-शब्दकोश-सन्दर्भग्रन्थानां सहायतया छात्राणां तत्परतावर्धनम्।
* प्राचीनार्वाचीनयोर्मध्ये समन्वयस्थापनद्वारा नूतनशिक्षणविधिभिश्च संस्कृतशिक्षणम्।

**कौशलानि-**

* ज्ञानात्मक-अवबोधनात्मक-अनुप्रयोगात्मक-विश्लेषणात्मक-संश्लेषणात्मक-मूल्याङ्कनात्मक-लक्षिताधिगमनविशेषाः।
* श्रवणकौशलम् – भावाधिग्रहणाय ध्वन्यात्मकं भाषायाः प्रथमं कौशलम् इदम्। अस्य साधनानि- गुरुमुखम्, आकाशवाणी, दूरवाणी, परिवारसदस्याः, समाजः, कक्ष्याः, ध्वनिमुद्रणयन्त्रम्, दूरदर्शनम् इत्यादयः।
* भाषणकौशलम्- भावाभिव्यक्तये ध्वन्यात्मकं भाषायाः इदं द्वितीयं कौशलम्। वाग्-रूपं भावप्रकटनम् एव भाषणम्, परिसरप्रभावेण आधारेण वा भाषणशक्तिः जायते।
* पठनकौशलम् – भावाधिग्रहणाय लिप्यात्मकं भाषायाः तृतीयं कौशलम् इदम्। (अर्थग्रहणपूर्वकं स्पष्टरूप-वाचनम् इत्यर्थः)
* लेखनकौशलम्- भावाभिव्यक्तये लिप्यात्मकं भाषायाः चतुर्थं कौशलम् इदम्। (ध्वनिरूपे विद्यमानं भाषांशं लिपिरूपे अवतारणं लेखनम् इति उच्यते)

# कक्षा – द्वादशी (2021-22)
## संस्कृतम् (केन्द्रिकम्)
## (कोड नं. 322)

आहत्य-अङ्काः – 80+20
आहत्य-कालांशाः – 220

**वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागद्वयं भविष्यति –**

| | | |
|---|---|---|
| **'अ' – भागः (बहुविकल्पात्मकाः प्रश्नाः)** | **40 अङ्काः** | |
| अनुप्रयुक्त – व्याकरणम् | 20 अङ्काः | 60 |
| पठितावबोधनम् | 10 अङ्काः | 40 |
| संस्कृतसाहित्येतिहासस्य सामान्यः परिचयः | 10 अङ्काः | 20 |
| **'आ' – भागः (वर्णनात्मकाः प्रश्नाः)** | **40 अङ्काः** | |
| अपठित – अवबोधनम् | 10 अङ्काः | 20 |
| रचनात्मक– कार्यम् | 15 अङ्काः | 30 |
| पठित – अवबोधनम् | 15 अङ्काः | 50 |

**भागानुसारं विषयाः मूल्यभारः च**

| **'अ' – भागः (बहुविकल्पात्मकाः प्रश्नाः) 40 अङ्काः** | | |
|---|---|---|
| **खण्डः** | **विषयाः** | **मूल्यभारः** |
| | **अनुप्रयुक्त – व्याकरणम्** | |
| 1. | सन्धिः | 1×6=6 |
| 2. | समासः | 1×5=5 |
| 3. | प्रत्ययः | 1×6=6 |
| 4. | उपपदविभक्तिप्रयोगः | 1×3=3 |
| | **पूर्णभारः** | **20 अङ्काः** |
| | **पठित – अवबोधनम्** | |
| 5. | भाषिककार्यम् (पाठाधारितम्) | 1×6=6 |
| 6. | प्रसङ्गानुसारं पदानाम् अर्थचयनम् | 1×4=4 |
| | **पूर्णभारः** | **10 अङ्काः** |
| | **संस्कृतसाहित्येतिहासस्य सामान्यः परिचयः** | |
| 7. | सन्दर्भग्रन्थाः, रचयितारः तेषां रचनाः च | 1×3=3 |
| 8. | महाकाव्यम्, गद्यकाव्यम्, चम्पूकाव्यम् | 1×3=3 |
| 9. | नाट्यतत्त्वानां परिचयः | 1×4=4 |
| | **पूर्णभारः** | **10 अङ्काः** |
| | | **सम्पूर्णभारः 40 अङ्काः** |

| 'आ' – भागः (वर्णनात्मकाः प्रश्नाः) | | | 40 अङ्काः |
|---|---|---|---|
| **खण्डः** | **विषयाः** | **प्रश्नप्रकाराः** | **मूल्यभारः** |
| **अपठित – अवबोधनम्** | | | |
| 10. | एकः गद्यांशः (80-100 शब्दपरिमितः) | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम्<br>भाषिककार्यम् | 1×2=2<br>2×2=4<br>1×1=1<br>1×3=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| **रचनात्मक – कार्यम्** | | | |
| 11. | औपचारिकम् अथवा अनौपचारिकं पत्रम्<br>(मञ्जूषायाः सहायतया पूर्णं पत्रं लेखनीयम्) | निबन्धात्मकः | ½×10=5 |
| 12. | लघुकथायां वार्तालापे वा एकपक्षपूरणम् | निबन्धात्मकः | 1×5=5 |
| 13. | अनुच्छेदलेखनम् अथवा<br>हिन्दी/आङ्ग्लभाषातः संस्कृतेन अनुवादः | निबन्धात्मकः /पूर्णवाक्यात्मकः | 1×5=5 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| **पठित – अवबोधनम्** | | | |
| 14. | गद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 15. | पद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 16. | नाट्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 17. | भावार्थलेखनम् | निबन्धात्मकः | ½×4=2 |
| 18. | अन्वयः | निबन्धात्मकः | ½×4=2 |
| 19. | वाक्यानां संयोजनम् | पूर्णवाक्यात्मकः | ½×4=2 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| | | | **सम्पूर्णभारः 40 अङ्काः** |

**'अ' भागः 40 + 'आ' भागः 40 = सम्पूर्णभारः 80 अङ्काः**

**संस्कृतम् (केन्द्रिकम्) (कोड सं. 322)**

**पाठ्यक्रमः परीक्षानिर्देशाश्च (2021-22)**

**कक्षा – द्वादशी (XII)**

**वार्षिकं मूल्याङ्कनम्**

**'अ' भागः** **40 अङ्काः**

**(बहुविकल्पात्मकाः प्रश्नाः)**

| | | |
|---|---|---|
| **अनुप्रयुक्तव्याकरणम् (20 अङ्काः)** | **1. पाठाधारिताः सन्धयः सन्धिविच्छेदाः च –**<br>**स्वरसन्धिः** (2 अङ्कौ)<br>➢ दीर्घः,गुणः, वृद्धिः, यण्, अयादिः, पूर्वरूपम्<br>**व्यञ्जनसन्धिः** (2 अङ्कौ)<br>➢ श्चुत्वम्, ष्टुत्वम्, जश्त्वम्, अनुनासिकः, अनुस्वारः,परसवर्णः।<br>**विसर्गसन्धिः** (2 अङ्कौ)<br>➢ उत्वम्, रत्वम्, लोपः, विसर्गस्थाने स्, श्, ष् | 6 |
| | **2. पाठाधारित-समासाः विग्रहाः च –**<br>**अव्ययीभावः** (1 अङ्कः)<br>➢ यथा, प्रति, उप, अनु, निर्, सह, अधि<br>**द्वन्द्वः** (1 अङ्कौ)<br>➢ इतरेतरद्वन्द्वः, समाहारः, एकशेषः<br>**तत्पुरुषः** (2 अङ्कौ)<br>➢ विभक्तितत्पुरुषः, कर्मधारयः, द्विगुः, उपपदतत्पुरुषः<br>**बहुव्रीहिः** (1 अङ्कः) | 5 |
| | **3. प्रत्ययाः-**<br>**कृत्-प्रत्ययाः** (3 अङ्काः)<br>➢ क्त, क्तवतु, तव्यत्, अनीयर्, शतृ, शानच्, क्तिन्<br>**तद्धित- प्रत्ययाः** (2 अङ्कौ)<br>➢ मतुप्, इन्, ठक्, ठञ्, त्व, तल्<br>**स्त्री-प्रत्ययौ** (1 अङ्कः)<br>➢ टाप्, ङीप् | 6 |
| | **4. उपपदविभक्तिप्रयोगः (पाठ्यपुस्तकाधारितः)** | 3 |
| **पठित-अवबोधनम् (10 अङ्काः)** | **5. भाषिककार्यम् –(पाठ्यपुस्तकाधारितम्)**<br>(i) विशेषण-विशेष्यपदचयनम्<br>(ii) कर्तृक्रिया-पदचयनम्<br>(iii) पर्याय/विलोमपदचयनम् | 6 |
| | **6. प्रदत्तपङ्क्तिषु प्रसङ्गानुसारं पदानाम् अर्थचयनम्** | 4 |

| | |
|---|---|
| संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः (10 अङ्काः) | 7. भास्वतीपाठ्यपुस्तकस्थ-पाठानां सन्दर्भग्रन्थाः, रचयितारः तेषां रचनाः च (1+1+1) 3<br>8. महाकाव्यम्, गद्यकाव्यम्, चम्पूकाव्यम् 3<br>9. नाट्यतत्त्वानां मुख्यविशेषतानां परिचयः 4 |
| | योगः = 40 अङ्काः |

## 'आ' भागः

## (वर्णनात्मकाः प्रश्नाः) 40 अङ्काः

| | | |
|---|---|---|
| अपठित – अवबोधनम् (10 अङ्काः) | 10. 80-100 शब्दपरिमितः अपठितः गद्यांशः, सरलकथा वा।<br>प्रश्नवैविध्यम्<br>➢ एकपदेन उत्तरम् (2)<br>➢ पूर्णवाक्येन उत्तरम् (4)<br>➢ समुचितशीर्षकलेखनम् (1)<br>➢ वाक्ये कर्तृक्रिया-पदचयनम्, विशेषण- विशेष्य/पर्याय /विलोमादिचयनम् (3) | 10 |
| रचनात्मकं कार्यम् (15 अङ्काः) | 11. औपचारिकम् अनौपचारिकं पत्रम्/प्रार्थनापत्रम्<br>(मञ्जूषायाः सहायतया पूर्णं पत्रं लेखनीयम्) | 5 |
| | 12. लघुकथा वार्तालापे एकपक्षपूरणम्<br>(मञ्जूषायाः सहायतया पूर्णा कथा/पूर्णः वार्तालापः लेखनीयः) | 5 |
| | 13. सङ्केताधारितम् अनुच्छेदलेखनम् /हिन्दीभाषया आङ्ग्लभाषया वा लिखितानां पञ्चसरलवाक्यानां संस्कृतभाषया अनुवादः। | 5 |
| पठित – अवबोधनम् (15 अङ्काः) | 14. गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि। | 3 |
| | 15. पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि। | 3 |
| | 16. नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि। | 3 |
| | 17. भावार्थलेखनम्<br>(मञ्जूषायाः सहायतया पूर्णः भावार्थः लेखनीयः) | 2 |
| | 18. अन्वयः<br>(मञ्जूषायाः सहायतया पूर्णः अन्वयः लेखनीयः) | 2 |
| | 19. प्रदत्तवाक्यांशानां सार्थकं संयोजनम्। | 2 |
| | | योगः = 40 अङ्काः |

**सम्पूर्ण-योगः अ-भागः 40 अङ्काः + आ- भागः 40 अङ्काः = 80 अङ्काः**

**निर्धारिते पाठ्यपुस्तके – 1. भास्वती - द्वितीयो भागः** - रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम्।

2. **संस्कृतसाहित्यपरिचयः** - (संशोधितसंस्करणम) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम्।

**परीक्षायै निर्धारिताः पाठाः**

| **भास्वती - द्वितीयो भागः** | | **संस्कृत-साहित्य-परिचय** | |
|---|---|---|---|
| **पाठसङ्ख्या** | **पाठनाम** | **पाठसङ्ख्या** | **पाठनाम** |
| प्रथमः पाठः | अनुशासनम् | चतुर्थ अध्याय | महाकाव्य |
| द्वितीयः पाठः | न त्वं शोचितुमर्हसि | सप्तम अध्याय | गद्यकाव्य एवं चम्पूकाव्य |
| तृतीयः पाठः | मातुराज्ञा गरीयसी | नवम अध्याय | नाट्य साहित्य |
| चतुर्थः पाठः | प्रजानुरञ्जको नृपः | | |
| पञ्चमः पाठः | दौवारिकस्य निष्ठा | | |
| षष्ठः पाठः | सूक्ति-सौरभम् | | |
| सप्तमः पाठः | नैकेनापि समं गता वसुमती | | |
| अष्टमः पाठः | हल्दीघाटी | | |
| नवमः पाठः | मदालसा | | |
| एकादशः पाठः | कार्याकार्यव्यवस्थितिः | | |

**अतिरिक्तपठनाय**

- व्याकरणसौरभम् (संशोधितसंस्करणम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम्।
- रचनानुवादकौमुदी (सहायकपुस्तकम्) कपिलदेवद्विवेदीलिखितम् विश्वविद्यालयप्रकाशनम्, वाराणसी।
- वेदपारिजात (अतिरिक्ताध्ययनार्थम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम्।

## आन्तरिक-मूल्याङ्कनम्   (अङ्काः - 20)

1. **परियोजनाकार्यम्** - 10 **अङ्काः**

2. **गतिविधयः** - 10 **अङ्काः**

**उद्देश्यानि –**

- ❖ छात्राणां विविध-जीवन-कौशलानां विकासः।
- ❖ छात्राः समाजस्य विविध-समस्याः ज्ञात्वा समाधाने समर्थाः स्युः।
- ❖ गवेषणात्मक-चिन्तनशक्तेः विकासः।
- ❖ संस्कृत-जगतः समस्यानां सम्मुखीकरणम्।
- ❖ छात्राणां सृजनात्मकक्षमतायाः विकासः।
- ❖ श्रवण-भाषण-पठन-लेखनकौशलानां विकासः।
- ❖ आत्मविश्वासस्य संवर्धनम्।

| क्र. सं. | गतिविधयः | उदाहरणानि | अङ्काः | निर्देशाः | मूल्याङ्कनबिन्दवः |
|---|---|---|---|---|---|
| 1 | परियोजना-कार्यम् | ❖ मिथ्यावार्तायाः (Fake News) दुष्प्रभावाः।<br>❖ अध्ययने अन्तर्जालस्य उपयोगिता<br>❖ संस्कृतं व्यवहारभाषां कर्तुं समस्याः समाधानञ्च।<br>❖ "सोशलमीडिया" इत्यस्य सदुपयोगः।<br>❖ भारतीयसंस्कृतौ वैज्ञानिकचिन्तनम्।<br>❖ स्वक्षेत्रे जायमानस्य प्रदूषणस्य कारणानि समाधानञ्च।<br>❖ स्वक्षेत्रे स्वच्छभारताभियानस्य स्थितिः।<br>❖ संस्कृताध्ययनं प्रति छात्राणाम् उदासीनतायाः कारणानि तन्निराकरणोपायाश्च।<br>❖ आयुष्मद्भारतम्' इति सर्वकारीय-योजनाविषये लाभार्थिनां जागरूकतायाः विश्लेषणम्। | 10 | ❖ सत्रारम्भे एव विषयः सूचनीयः।<br>❖ आवर्षं छात्राः एतेषु विषयेषु अध्ययनं कुर्युः।<br>❖ शिक्षकेण समये समये परियोजनाकार्यस्य प्रगतिः ज्ञातव्या छात्राणां च मार्गदर्शनं करणीयम्।<br>❖ कदाचित् छात्राः संस्कृतेन लेखितुं कष्टमनुभवन्ति तदा शिक्षकेण साहाय्यं करणीयम्।<br>❖ परियोजनाकार्याणां विवरणं सप्रमाणं सुरक्षितं स्थापनीयम्।<br>❖ परियोजनाकार्याणि संस्कृतेन एव भवेयुः। | ❖ मौलिकता<br>❖ विषयसम्बद्धता<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम् |

| | | | | | |
|---|---|---|---|---|---|
| 2 | श्रवण-भाषण-कौशलम् | ❖ कथा<br>❖ संवादः / वार्तालापः<br>❖ भाषणम्<br>❖ नाटकम्<br>❖ वार्ताः<br>❖ आशुभाषणम्<br>❖ वार्तावलिः (समूहचर्चा)<br>❖ संस्कृतगीतानि<br>❖ श्लोकोच्चारणम्<br>❖ प्रहेलिकाः | 05 | ❖ छात्राः कामपि कथां श्रावयितुं शक्नुवन्ति।<br>❖ शिक्षकः कमपि विषयं सूचयित्वा परस्परं संवादं कारयितुं शक्नोति।<br>❖ दूरदर्शने वार्तावली इत्याख्यः संस्कृत-कार्यक्रमः प्रसारितः भवति तं द्रष्टुं छात्राः प्रेरणीयाः।<br>❖ श्रवण-कौशल-मूल्याङ्कनाय शिक्षकः स्वयम् अपि कथां श्रावयित्वा ततः सम्बद्ध-प्रश्नान् प्रष्टुं शक्नोति।<br>❖ वर्षे न्यूनातिन्यूनं त्रयः गतिविधयः कारणीयाः तेषु सर्वोत्तमाः अङ्काः ग्राह्याः।<br>❖ विवरणं सप्रमाणं सुरक्षितं स्थापनीयम्। | ❖ उच्चारणम्<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम्<br>❖ आरोहावरोह-गतियति-प्रयोगः |
| 3 | लेखन-कौशलम् | ❖ विविधविषयान् आधृत्य मौलिकलेखनम्<br>❖ यथा– माता, पिता, गुरुः, पर्यावरणम्, विद्या, योगः, समयस्य सदुपयोगः, शिक्षा, अनुशासनम् इत्यादयः।<br>❖ शैक्षिकभ्रमणस्य संस्कृतेन प्रतिवेदनलेखनम्।<br>❖ दैनन्दिनीलेखनम्।<br>❖ सङ्केताधारितं कथालेखनम्।<br>❖ श्रुतलेखः | 05 | ❖ छात्राः यथाशक्यं कक्षायामेव लेखनकार्यं कुर्युः।<br>❖ अत्र पञ्जिका-निर्माणम् अपि कारयितुं शक्यते।<br>❖ विवरणं सप्रमाणं सुरक्षितं स्थापनीयम्। | ❖ विषय-सम्बद्धता<br>❖ शुद्धता (विशेषतः पञ्चमवर्णस्य प्रयोगः)<br>❖ समयबद्धता<br>❖ सुलेखः<br>❖ प्रस्तुतीकरणम् |

**अवधातव्यम् –**

उपर्युक्त-परियोजनाकार्याणि गतिविधयश्च उदाहरणरूपेण प्रदत्ताः सन्ति। एतदतिरिच्य एतादृशाः अन्यविषयाः अपि भवितुमर्हन्ति।

*************************